# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - ओक्टोम्बर् - २०१९ (New)

| कक्षा- आचार्य-२(SEM-3) | प्रश्नपत्रम् – २ | गुणाः - ७० |
|---|---|---|
| विषयः - सर्वदर्शनम् | CC- 5.3.7 | समयः – ३ तः ६ |
| दिनाङ्कः – १०/१०/२०१९ | ग्रन्थः –श्रीमद्भगवद्गीता (अष्टादशोध्यायः) शाङ्करभाष्यसहिता। | |

**विभागः -१**

**प्रश्नः -१ निम्नलिखितयोः द्वयोरेकस्य समाधानं सप्रसङ्गं लिखत।** ०५

(१) यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥

(२) अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्॥

**प्रश्नः -२ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या ।** १०

(१) कर्म त्याज्यं नवेत्यत्र भगवतः निश्चितं मतं यथाभाष्यं विवृणुत।

(२) सन्न्यासत्यागयोः स्वरूपलक्षणे यथाभाष्यं व्याख्यात।

**विभागः -२**

**प्रश्नः -३ निम्नलिखितयोः द्वयोरेकस्य उत्तरं सन्दर्भसहितं लिखत ।** ०५

(१) सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥

(२) नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥

**प्रश्नः -४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) त्रिविधं सुखं यथाभाष्यं स्पष्टयत।

(२) करणं कर्म कर्तेति त्रिविधं कर्मसङ्ग्रहं यथाभाष्यं व्याख्यात।

**विभागः -३**

**प्रश्नः -५ निम्नलिखितयोः द्वयोरेकस्यस सन्दर्भव्याख्या देया।** ०५

(१) यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥

(२) स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छ्णु॥

**प्रश्नः -६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

(१) स्वभावप्रभवैर्गुणैर्विभक्तकर्माणि यथाभाष्यं व्याख्यात।

(२) 'निर्ममः शान्तः ब्रह्मभूयाय कल्पते' यथाभाष्यं प्रतिपादयत।

## विभागः - ४

**प्रश्नः -७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम् ।** **०५**

(१) सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

(२) यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥

**प्रश्नः -८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

(१) गीताशास्त्रानुसारं शाश्वतपराशान्तेः प्राप्तिमार्गमुपस्थापयत।

(२) अष्टादशाध्यायस्य सारांशं सङ्क्षेपेण प्रतिपादयत।

**प्रश्नः -९ अधोलिखितेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** **१०**

(१) सहजं कर्म सदोषं कर्तव्यं न वा?

(२) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति?

(३) शौर्यं तेजो धृतिर्दाक्ष्यमित्यादयः केषां कर्म ?

(४) विचक्षणाः 'त्याग'शब्दस्य किं निर्वचनं प्राहुः?

(५) सन्न्यासस्य तत्त्वं कः वेदितुमिच्छति?

(६) देहभृता कर्माण्यशेषतः त्यक्तुं शक्यते न वा?

(७) त्रिविधा कर्मचोदना का?

(८) सात्त्विकः कर्ता कः?

(९) त्रिविधः कर्मसङ्ग्रहः कः?

(१०) तामसं कर्म किम्?

(११) सन्न्यासेन किमधिगच्छति?

(१२) मानवः कथं सिद्धिं विन्दति?

(१३) सर्वभूतेषु ईश्वरः कुत्र तिष्ठति?

(१४) अष्टादशाध्याये कति श्लोकाः सन्ति?

(१५) परिचर्यात्मकं कर्म कस्य स्वभावजम्?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - ओक्टोम्बर् - २०१९ (New)

| | | |
|---|---|---|
| कक्षा- आचार्य-२(SEM-3) | प्रश्नपत्रम् – २ | गुणाः - ७० |
| विषयः - सर्वदर्शनम् | CC- 5.3.7 | समयः - |
| दिनाङ्कः - | ग्रन्थः –श्रीमद्भगवद्गीता (अष्टादशोध्यायः) शाङ्करभाष्यसहिता। | |

**प्रश्नः - ७**

**समाधानानि**

१. कर्तव्यमेव।

२. अष्टादशाध्यायाः सन्ति।

३. क्षात्रं कर्म स्वभावजम्।

४. सर्वकर्मफलत्यागम्।

५. अर्जुनः।

६. न हि शक्यते।

७. ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।

८. मुक्तसङ्गोऽनहंकारी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥

९. करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः।

१०. अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥

११. परमां नैष्कर्म्यसिद्धिम्।

१२. स्वकर्माणमभ्यर्च्य।

१३. हृद्देशे तिष्ठति।

१४. अष्टसप्ततिः ७८।

१५. शूद्रस्य स्वभावजम्।